तत्पर्य्यायः । शाम्बरी २ । इत्यमरः । २ । १० । ११ । इन्द्रजालिः ३ कुहकम् ४ कुसृतिः ५ शाम्बरिः ६ । इति जटाधरः । सम्बरी ७ । इति शब्दरत्नावली । माति विश्वमस्यां मनोवादिः । शम्बरस्य दैत्यस्य इयं शाम्बरी तेन प्राङ्निर्म्मितत्वात् । इति भरतः ॥ * ॥ बुद्धिः । इति मेदिनी । ये, ४६ । (मीमिते जानाति संख्यायनयेति । मा+यः टाप् ।) कृपा । दम्भः । इति नानार्थे हेमचन्द्रः ॥ शठता । यथा,—

"माया तु शठता शाठ्यं कुसृतिर्निकृतिश्च सा ॥"

(प्रज्ञा । यथा, ऋग्वेदे । २ । १७ । ५ ।

"अधारयत् पृथिवीं विश्वधायसमस्तभ्नात्
मायया द्यामवस्रसः ।"

"मायया प्रज्ञया ।" इति तद्भाष्ये सायनः ॥)

राज्ञां क्षुद्रोपायविशेषः । यथा,—

"मायोपेक्षेन्द्रजालानि क्षुद्रोपाया इमे त्रयः ॥"

लक्ष्मीः । इति च हेमचन्द्रः ॥ बुद्धमाता । इत्यमरकोषे मायादेवीसुतशब्ददर्शनात् । दुर्गा । यथा,—

"दुर्गे शिवेऽभये माये नारायणि सनातनि ।
जये मे मङ्गलं देहि नमस्ते सर्व्वमङ्गले ।
राजन् ! श्रीवचनो माश्च याश्च प्रापणवाचकः ।
तां प्रापयति या सद्यः सा माया परिकीर्त्तिता ॥
माश्च मोहार्थवचनो याश्च प्रापणवाचकः ।
तं प्रापयति या नित्यं सा माया परिकीर्त्तिता ॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २७ अध्यायः ॥

अपि च ।

"विचित्रकार्य्यकारण्या अचिन्तितफलप्रदा ।
स्वप्नेन्द्रजालवल्लोके माया तेन प्रकीर्त्तिता ॥"

इति देवीपुराणे ४५ अध्यायः ॥ * ॥

विषयप्रतीतिसाधनं माया । इति नागोजीभट्टः ॥ अघटनघटनपटीयसी माया । इति केचित् ॥ ईश्वरशक्तिः । तस्या नामान्तरं यथा । प्रकृतिः २ अविद्या ३ अज्ञानम् ४ प्रधानम् ५ शक्तिः ६ अजा ७ । सृष्टिकाले भगवान् आदौ मायां प्रकाशयामास । सा दृष्टस्यानुसन्धानरूपा कार्य्यकारणरूपा च । सत्त्वरजस्तमोगुणमयी । तस्याः शक्तिद्वयं आवरणं विक्षेपश्च । तस्या मायाया महत्तत्त्वं जातम् । तस्मादहङ्कारः । तस्मात् पञ्चभूतम् । तस्मात् ब्रह्माण्डम् । इति श्रीभागवतमतम् ॥ (मायास्वरूपम् । यथा च पञ्चदश्याम् । ६ । १२९—१४१ ।

"तत्त्वनिश्चयकामेन न्यायागमविचारिणाम् ।
एकैव प्रतिपत्तिः स्यात् साप्यत्र स्फुटमुच्यते ॥
मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् ।
अस्यावयवभूतैस्तु व्याप्तं सर्व्वमिदं जगत् ॥
इति श्रुत्यनुसारेण न्यायो निर्णय ईश्वरे ।
तथा सत्यविरोधः स्यात् स्थावरान्तेशवादिनाम् ॥
माया चेयं तमोरूपा तापनीये तदीरणात् ।
अनुभूतिं तत्र मानं प्रतिजज्ञे श्रुतिः स्वयम् ॥
जड़ं मोहात्मकं तच्चेत्यनुभावयति श्रुतिः ।
आबालगोपं स्पष्टत्वादानन्त्यं तस्य साब्रवीत् ॥
अचिदात्मघटादीनां यत् स्वरूपं जड़ं हि तत् ।
यत्र कुण्ठीभवेद् बुद्धिः स मोह इति लौकिकाः ॥
इत्थं लौकिकदृष्ट्यैतत् सर्व्वैरप्यनुभूयते ।
युक्तिदृष्ट्या त्वनिर्वाच्यं नासदासीदिति श्रुतेः ॥
नासदासीद् विभातत्वान्नो सदासीच्च बाधनात् ।
विद्यादृष्ट्या श्रुतं तुच्छं तस्य नित्यनिवृत्तितः ॥
तुच्छानिर्व्वचनीया च वास्तवी चेत्यसौ त्रिधा ।
ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः ॥
अस्य सत्त्वमसत्त्वञ्च जगतो दर्शयत्यसौ ।
प्रसारणाच्च सङ्कोचात् यथा चित्रपटस्तथा ॥
अस्वतन्त्रा हि माया स्यादप्रतीतेर्व्विना चितिम् ।
स्वतन्त्रापि तथैव स्यादसङ्गस्यान्यथाकृतिः ॥
कूटस्थासङ्गमात्मानं जड़त्वेन करोति सा ।
चिदाभासस्वरूपेण जीवेशावपि निर्म्ममे ॥
कूटस्थमनपाकृत्य करोति जगदादिकम् ।
दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः ॥
द्रवत्वमुदके वह्नावौष्ण्यं काठिन्यमश्मनि ।
मायाया दुर्घटत्वञ्च स्वतः सिध्यति नान्यथा ॥
न वेत्ति मायिनं लोको यावत् तावच्चमत्कृतिम् ।
धत्ते मनसि पश्चात्तु मायैषेत्युपशाम्यति ॥
प्रसरन्ति हि चोद्यानि जगद्वस्तुत्ववादिषु ।
न चोदनीयं मायायां तस्याश्चोद्यैकरूपतः ॥
चोद्येऽपि यदि चोद्यं स्यात् त्वच्चोद्ये चोद्यते मया ।
परिहार्य्यं ततश्चोद्यं न पुनः प्रतिचोद्यताम् ॥
विस्मयैकशरीराया मायायाश्चोद्यरूपतः ।
अन्वेष्यः परिहारोऽस्या बुद्धिमद्भिः प्रयत्नतः ॥
मायात्वमेव निश्चेयमिति चेत् तर्हि निश्चिनु ।
लोकप्रसिद्धमायाया लक्षणं यत् तदीक्ष्यताम् ॥
न निरूपयितुं शक्या विस्पष्टं भासते च या ।
सा मायेतीन्द्रजालादौ लोकाः सम्प्रतिपेदिरे ॥")

विष्णुमायास्वरूपं यथा,—

"यामेतां भाषसे देव ! मम मायेति नित्यशः ।
का माया कीदृशी विष्णो ! किं वा मायेति
चोच्यते ।
ज्ञातुमिच्छामि मायायाः रहस्यं परमुत्तमम् ॥
ततस्तस्या वचः श्रुत्वा विष्णुर्मायाकरण्डकः ।
प्रहस्य मधुरं वाक्यं प्रत्युवाच वसुन्धराम् ॥
भूमे ! मा पृच्छ मायां मे वृथा पृच्छसि सादरम् ।
वृथा क्लेशं किमर्थं त्वं प्राप्स्यसे मद्विलोकनात् ।
अद्यापि मां न जानन्ति रुद्रेन्द्राः सपितामहाः ॥
मम माया विशालाक्षि ! किं पुनस्त्वं वसुन्धरे ! ॥
पर्ज्जन्यो वर्षते यत्र तज्जलेन प्रपूर्य्यते ।
देशो निर्ज्जलतां याति एषा माया मम प्रिये ! ॥
सोमोऽपि क्षीयते पक्षे पक्षे चापि विवर्द्धते ।
अमायां स न दृश्येत मायेयं मम सुन्दरि ! ॥
हेमन्ते सलिलं कूपे उष्णं भवति तत्त्वतः ।
भवेच्च शीतलं ग्रीष्मे मायेयं मम तत्त्वतः ॥
पश्चिमां दिशमाश्रित्य यदस्तं याति भास्करः ।
उदेति पूर्व्वतः प्रातर्मायेयं मम सुन्दरि ! ॥
शोणितञ्चैव शुक्रञ्च उभे प्राणिषु संस्थिते ।
गर्भे च जायते जन्तुर्मम मायैव चोत्तमा ।
जीवः प्रविश्य गर्भं तु सुखदुःखानि विन्दति ।
जातश्च विस्मरेत् सर्व्वमेषा माया ममोत्तमा ॥
आत्मकर्म्माश्रितो जीवो नष्टसंज्ञो गतस्पृहः ।
कर्म्मणा नीयतेऽन्यत्र मायैषा मम चोत्तमा ॥
शुक्रशोणितसंयोगाज्जायन्ते यदि जन्तवः ।
अङ्गुल्यश्चरणौ चैव भुजौ शीर्षं कटिस्तथा ॥
पृष्ठं तथोदरञ्चैव दन्तौष्ठपुटनासिका ।
कर्णौ नेत्रकपोलौ च ललाटं जिह्वया सह ॥
एतया मायया युक्ता जायन्ते यदि जन्तवः ।
तस्यैव जीर्य्यते जन्तोर्भुक्तं पीतञ्च वह्निना ।
अयञ्च स्रवते जन्तुरेषा माया ममोत्तमा ॥
शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः ।
अस्मात् प्रवर्त्तते जन्तुरेषा माया मम प्रिये ! ॥
सर्व्वर्त्तुषु निराकारः स्थावरे जङ्गमे तथा ।
तत्त्वं न ज्ञायते तस्य मायैषा मम सुन्दरि ! ॥
आपो दिव्यास्तथा भौमा आपो येषु प्रतिष्ठिताः
न च वृद्धिं प्रयान्त्यत्र मायैषा परमा मम ।
दृष्टौ मधूदकाः सर्व्वे पल्वलानि सरांसि च ।
ग्रीष्मे सर्व्वाणि शुष्यन्ति एतन्मायाबलं मम ॥
हिमवच्छिखरान्मुक्ता नाम्ना मन्दाकिनी नदी ।
गाङ्गता सा भवेद्गङ्गा मायैषा मम कीर्त्तिता ॥
मेघा वहन्ति सलिलं लवणात् सलिलार्णवात् ।
वर्षन्ति मधुरं लोके सर्व्वं मायाबलं मम ॥
रोगार्त्ता जन्तवः केचित् भक्षयन्ति महौषधम् ।
तस्य वीर्य्यं समाश्रित्य मायां तु विहराम्यहम् ॥
औषधे दीयमाने तु जन्तुः पञ्चत्वमेति यत् ।
निर्वीर्य्यमौषधं कृत्वा कालो भूत्वा हराम्यहम् ॥
प्रथमं जायते गर्भः पश्चाज्जायेत वै पुमान् ।
जायते मध्यमं रूपं ततोऽपि जरया पुनः ।
तत इन्द्रियनाशश्च एतन्मायाबलं मम ॥
एकबीजात् प्रकीर्णानि जायन्ते तानि भूरिशः ।
तत्रान्तरं विहरामि मायायोगेन माधवि ! ॥
लोक एवं विजानाति गरुड़ो वहतेऽच्युतम् ।
भूत्वा वेगेन गरुड़ो वहाम्यात्मानमात्मना ॥
या एता देवताः सर्व्वा यज्ञभागेन तोषिताः ।
मायामेतामहं कृत्वा तोषयामि दिवौकसः ॥
लोकाः सर्व्वे विजानन्ति देवा नित्यं मखाशिनः ।
मायामेतामहं कृत्वा यक्ष्यामि त्रिदशान् सदा ॥
सर्व्वोऽपि यजते लोको यदारभ्य बृहस्पतिम् ।
मायामाङ्गिरसीं कृत्वा याजयामि दिवौकसः ॥
सर्व्वे लोका विजानन्ति वरुणः पाति सागरम् ।
मायान्तु वारुणीं कृत्वाहं रक्षामि महोदधिम् ॥
सर्व्वे लोका विजानन्ति कुवेरोऽयं धनेश्वरः ।
कुवेरमायामादाय अहं रक्षामि तद्धनम् ॥
एवं लोका विजानन्ति वृत्रः शक्रेण सूदितः ।
शाक्रीं मायां समास्थाय मया वृत्रो निसूदितः ॥
एवं लोका विजानन्ति आदित्यश्च भुवो महान् ।
मेरुं मायामयं कृत्वा वहाम्यादित्यमेव च ॥
एवं चाभाषते लोको जलं किमस्यतेऽखिलम् ।
वड़वामुखमास्थाय पिबामि तदहं जलम् ॥
वायुं मायामयं कृत्वा मेघेषु विहराम्यहम् ।
यदिदं भाषते लोकः कुचैर्य्यं तिष्ठते जलम् ॥